॥श्रेयसु श्रावबोध्यासर्वशास्त्रार्थनिलयः॥॥शाके १९५७॥

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः श्रीगुरवे नमः ॥
श्रीरामं सपरिवारं प्रणम्य क्रमकारः ॥ कुर्वे सुखावबो
धाय सर्वशास्त्रार्थनिर्णयं ॥ १ ॥ तत्र तावद्दृष्टार्थतत्तुमा
सश्चपक्षप्रकारणांतरमुच्यते ॥ चांद्रः सौरः सावनो ना
क्षत्रो बार्हस्पत्य इति ॥ तदुक्तं माधवाचार्यैः ॥ अहः पंच
विधाश्चांद्रो व्रतादौ तिलकादिके ॥ सुजन्मादिव्रते सौरो
गोसत्रादिषु सावनः ॥ त्रयोप्याचार्यसेवादौ विकल्पांतो ॥ १ ॥
निजेच्छया ॥ आयुर्दायेतु नाक्षत्रो बार्हस्पत्योधिवत्सरे इति ॥
तिलकव्रतं भविष्ये ॥ तिलकादीत्यादिशब्देनानंतव्रतं
विवक्षितं ॥ व्रतादावियनेन निरूढः पशुबंधः ॥ सुज
न्मादावपि व्रतं विष्णोर्धर्मतिरेदर्शितं ॥ आदिशब्दात्या

ह्यंतु व्रतकांडे द्रष्टव्यं ॥ सेगोत्रे गावो वाहः एतत्सत्रमासते
इति ब्राह्मणे समाम्नातं ॥ आदिशब्देनोत्सर्गेणाध्ययनं गृह्य
ते ॥ आचार्यसेवा विद्यार्थिनामाचार्यप्रसादयितुं अथ
वैलिकैः समाम्नाता आदिशब्देनारलिकेतु चयनांगत्रि
षवणस्नानादिगृह्यते ॥ नाक्षत्रो ज्योतिःशास्त्रे उपयुज्य
ते ॥ अमनस्यविभागेन विनियोगमाह ॥ उभयेकर्मणि शां
तेच स्योयनेदक्षिणोत्तरे ॥ इति मात्रमेरवाद्युपदेवताप्र
तिष्ठायां दक्षिणायनं ग्राह्यं ॥ शिवादिषूत्तरायणं ग्राह्यं ॥
ततु विभागेन विनियोगमाह ॥ वसंतादृतवो द्वेधा चांद्राः
सौराश्च चंद्रतः ॥ चैत्राद्याश्चैत्रमीनाश्च मेषाद्यावविव
स्वतः ॥ तेष्टाध्यानादयस्तद्वत्स्मृतिव्रतपूजनमिति ॥ चै

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

त्रमौवैशाखमासोचांद्रौवसंतर्तुः॥मीनैमेषमासौमेषवृ
षभमासोवासौरः॥एवंग्रीष्मादिकृत्यं॥वसंतेब्राह्मणोनी
नादधीतेयादिप्रसिद्धं॥वसंतादिषुमेक्रमषण्मांदेवता
मूर्तीनांपूजाविलुंधमैत्रेदर्शिता॥॥मासानांविभागं
विनियोगंचाह॥मासास्तुसावनःसौरश्चांद्रोनाक्षत्रइ
ष्टमी॥दर्शांतःपूर्णिमांतोवाचांद्रोसौविप्रवैश्ययोः॥ ॥२॥
सौरोराज्ञःसावनश्चयज्ञेज्योतिषिक्रेपरः॥माघामास
केदेषुतिलदानादयःस्मृतः॥इतिस्पष्टोर्थः॥चांद्रमा
सेकिंचिद्विशेषमाह॥चांद्रोऽधिमासोऽसंक्रांतःसांत
र्भवतिचोत्तरे॥असंक्रांतावेकवर्षे द्वौचेत्संसर्पआदिमः॥
क्षयमासोद्विसंक्रांतःसबाहुस्पतिसंसकः॥त्रयस्या

ज्याविवाहादौसंसर्पोहस्पतीउभौ॥शुद्धोऽतेत
थास्मार्तेमलमासेविविच्यते॥॥अथमलमासेवर्ज्या
वर्ज्यानि॥॥क्राम्यारंभसमाप्तिंमलमासेविवर्ज
येदिति॥अनंतव्रतलक्ष्मीव्रतादिक्राम्यं॥क्वचितुक्रा
म्यस्यापिसमाप्तिंमंगीकरोति॥आरब्धंमलमासात्क्रा
लघुसत्रादिकंचयत्॥तत्समाप्तिंसावनस्यमासस्या
नतिलंघनात्॥द्वादशदिनसाध्यंप्रजापत्यंलघु॥त्रि
शद्दिनसाध्यंचांद्रायणं॥तथात्रयोदशरात्रादीनीस
त्राणिद्विरात्रादीनामावश्यकानांचशास्त्रोक्तदिवस
संख्यातस्याश्चलंघयितुमशक्यत्वात्लघुदिसमाप्ति
रावश्यभाविनी॥आरंभसमाप्तिवदनुष्ठानमपिवर्ज

नीयमियाशंकाह॥व्यासः॥आरब्धस्यासमाप्तस्य
मध्येस्याद्वैमलिम्लुचः॥प्रवृत्तमखिलंकाम्यंनदो
नुष्ठेयमेवच॥अतएवत्रिरात्रः श्रावणाधिमासे
ऽपिचातुर्मास्यव्रतान्यनुष्ठीयंते॥यथाविषयविशेष
णमलमासेसमाप्तिरनुष्ठानंचारभ्यते॥तथाप्रारंभो
पिक्वचिदित्याह॥कारीर्यादिनुयत्काम्यंतस्यारंभस
मापने॥कार्यकालविलंबस्यप्रतीक्षायाअसंभवात्॥
कारीर्यादिष्टिक्रामोयज्ञेतेतिकारीरिविहिता॥आ ॥३॥
दिशब्देनग्रहयज्ञस्तत्रिक्रियसितुंरक्षोघ्नेष्टिर्विहिता॥
तत्रयदिमलमासमपनेतुंकालविलंबंप्रतीक्ष्यते॥
तदासस्यानिशुष्येयुः॥ग्रहयज्ञस्तोपिम्रियेत॥काम्य

॥३॥

कर्मस्येवनियतकर्मस्यपिवर्ज्यावर्ज्यविभागदर्शयति॥अ
नन्यगतिकंनियमग्निहोत्रादिनसंत्यजेत्॥गसंतरयुतंनियं
सोमयागादिवर्जयेत्॥सायंप्रातर्विहीनस्याग्निहोत्रस्या
करणेप्रत्यवायादनैन्यगतिकत्वं॥आदिशब्देनदर्शपूर्णमा
सौयाह्यौ॥सोमयागस्यवसंतर्तुविहितस्यशुद्धमासेपिक
र्तुंशक्यौनिरुद्धःपशुबंधोगृह्यते॥नियतकर्मन्यायेननैमि
त्तिकंप्रतिदिशति॥अगतियज्ञस्नानंजातेष्टिर्गतिसंयुता॥
द्वयंनैमित्तिकंतस्यव्यवस्थानियतमतेति॥मलमासेप्रा
प्तेयज्ञशुद्धमासेसंपादयितुमशक्यत्वादगतित्वं॥वैश्वा
नरंद्वादशकपालंनिर्वपेत्॥पुत्रेजातइतिविहितजाते
ष्टिस्तथास्याश्चशुद्धमासेपिकर्तुंशक्यत्वात्गतियुक्तं॥त

दुर्कं श्राद्धं कृत्वा ॥ प्रवृत्तं मलमासे श्राद्धं कार्यमसमा
पितं ॥ आगते मलमासे पितृसमाप्यमसंन्यायमिति ॥ प्र
याद्धिकस्य तु मरणे समृतानां तु मलस्यादाद्धिकांतरं ॥
मलमासरहिते वैशाखे मृतस्य तु यद्यपि तत्र वि
हिते संवत्सरे अधिके वैशाखे प्रथमं प्राद्धिकं प्राप्नु
यात् तदा कर्तव्यमेव ॥ अधिके वैशाखे प्रथमं प्राद्धि
कं प्राप्नुयात् तदा कर्तव्यमेव ॥ अधिके वैशाखे मृतस्य तु
प्रथमं प्राद्धिकं सर्वथा नाधिमासे प्राप्नोति ॥ किं
तु आद्धिकांतरं यदा कदाचित् अधिमासे प्राप्नोति
तदा तत् कर्तव्यं ॥ अन्यच्च कालनिर्णयदीपिकाकारेणो
क्तं ॥ त्रिंशदतिवत्सरे समाप्तिनेतत्राधिकं मासिकमिति ॥ ॥

॥४॥

तथा चाह कौमशुक्लिः ॥ अष्टमं बुधवृद्धादनं वो
पिसुसंचितं ॥ संवत्सरे विवृद्धौ पि प्रतिमासं च मासि
कमिति ॥ ॥ अथ मलिम्लुचो मृतिचारमध्ये तदाद्धा
द्धिकं कुर्यान्मासचतुर्दशीद्वय इति ॥ अस्यायमर्थः ॥ मृत
वर्षमध्ये चेन्मलमासो भवति तदा चतुर्दशीमासि प्रथ
माद्धिकं कर्तव्यं ॥ पक्षयोर्विनियोगमाह ॥ ॥ दैवे मुख्यः
शुक्लपक्षो लेप्यः पित्र्ये विशिष्यते इति ॥ पक्षः पंचद
शादिनात्मकः ॥ तत्र वक्ष्यमाणविषये बुद्धिसमाधाना
यदैवं पित्र्यं विभज्यानुक्रमति ॥ उपवासश्चैकभक्तं
नक्तं चायाचितव्रतं ॥ दानं च षड्विधं दैवं क्रमादत्र
विविच्यते ॥ ॥ अत्रोपवासे प्रतिपदो निर्णयः ॥ शु

कृष्णपक्षे दर्शविद्धा सप्तमीविद्धा द्वितीयया ॥ उपोष्या प्रति
पच्छुक्लमुख्या स्यादापरह्णिकी ॥ तदभावे तु सायाह्न-
व्यापिनी ग्राह्यतामिति ॥ शुक्लप्रतिपदोभावे स्याद्विद्धा
याः सायाह्नव्यापिक्षमवश्यं भावः यति सायाह्नादर्वा
क्कृष्णपराह्णेपि क्रियती भवति तदा प्रशस्ता ॥ तत्र सा
याह्नापराह्णयोर्विवक्षितविशेषमेवगमयितुं स्वा
भिमतमन्त्रो विभागं दर्शयति ॥ प्रातः संगवमध्या
ह्नापराह्णाः सायमित्यसौ ॥ तत्राह्नः पंचधा भागो मु
ख्यो द्वित्र्यादिभागतः ॥ उदये पूर्वया तिथ्या विध्यते त्रि
मुहूर्तके ॥ सायं तूत्तरया तिथ्या न्यूनयाननुविध्यते ॥
उपवासव्रते कुर्याद्द्वितीयां तु परान्विते इति ॥ तदुक्तं वि

॥५॥

DR BHAU DAJI

स्मृधर्मोत्तरे ॥ एकादश्यष्टमीषष्ठी द्वितीया चतुर्दशी ॥ त्र
योदशी अमावास्या ता उपोष्याः परान्विता इति इत्यादिव
चनात्सर्वापि द्वितीया परैव ॥ द्वितीया प्रतिपद्युक्ता तिपुरा
णवचनं तद्यमद्वितीया परं ॥ तत्र भगिनीभिर्भ्रातरो भो
ज्यंते ॥ रंभा रम्यां वर्णयित्वा तु तृतीयां द्विजसत्तम ॥ अन्ये
षु सर्वकार्येषु गलयुक्ता प्रशस्यते ॥ चतुर्थी चतृतीया
यां महापुण्यफलप्रदा ॥ कर्तव्या व्रतिभिर्वत्सगलना
थसुतोद्भवा इति वचनात्तृतीयायुते वोपवसनीया ॥ पं
चमी तु प्रकर्तव्या षष्ठ्यायुक्ता तु नारद इति वचनात्परैव
पोष्या ॥ शुक्लपक्षे सप्तमी चैव शुक्लपक्षे चतुर्दशी ॥ अमा
वास्या तृतीया च ता उपोष्याः परान्विताः ॥ अन्याश्च तिथ

यः सर्वा उपोष्याः पूर्वसंयुतेति॥ अन्याश्च तिथयः सर्वा इ
तिवचनांतरैर्विहितपरविद्धोपवासनीयतिथिव्यतिरि
क्ता इत्यर्थः॥ तृतीयैकादशीषष्ठीतथाचैवाष्टमीतिथिः॥
कृष्णपक्षे तु पूर्वैता उपवासव्रतादिषु॥ कृष्णाष्टमी वृह
त्तपा सावित्री वटपेटकी॥ कामत्रयोदशी रंभा उपोष्याः
पूर्वसंयुताः॥ रुद्रव्रतेषु सर्वेषु कर्तव्या संमुखी तिथिः॥ ॥६॥
रिति॥ ॥इति उपवासतिथिनिर्णयः॥ एकभक्तस्य काल
निर्णीयते॥ अथैकभक्तस्य मुख्यकालस्त्रिधा विभक्त
स्याह॥ मध्यांशः तस्यांते एकभक्तमिति॥ अयं मुख्यः का
लो मध्याह्नव्यापिनी ग्राह्या॥ एकभक्तं सदा तिथिरिति प्र
पुराणवचनात्॥ अतऊर्ध्वं गौणः सो सूर्यावधिरिति॥

अथ दिनद्वयेपि मुख्यकालसमव्याप्ततिथिर्वर्तते तदा पूर्वै
व॥ वैषम्ये सति यदा तदा मुख्यकालाधिकं यया व्याप्यते सैव कृ
ह्यते॥ ॥अथ नक्तकालमाह॥ प्रदोषव्यापिनी ग्राह्या तिथिर्न
क्तव्रते सदा॥ एकादशीं विना सर्वा शुक्लेह्नि समाश्रिता इति॥
प्रदोषप्रमाणं वक्ष्यते॥ त्रिमुहूर्तः प्रदोषः स्याद्रात्रेस्तु गते त
तः॥ इति स्कांदोक्तं ज्ञेयं॥ उदयाद्रात्रौ संध्याघटिकात्रय
मुच्यते॥ सायंसंध्या त्रिघटिका अस्तादुपरि भास्वतः॥ चरा
चरीमानिकर्मालिसंध्यायां परिवर्जयेत्॥ आहारं मैथुनं निद्रां
स्वाध्यायं च चतुर्थकं॥ एवं च संध्यायां भोजननिषेधे प्राप्ते नक्ष
त्रदर्शनात्सायंसंध्यातस्मान्नक्षत्रदर्शनं पर्यंतपरे प्रदोषे
नक्तं युर्यादित्यर्थः॥ आदित्यवारादौ नक्तभोजनस्य निषेधे
सत्यपि नक्तं यामद्वयमित्याह॥ कालनिर्णयदीपिकाकारः॥

नोहेयं वितनत्वतो व्रतवताप्यादिसवारादिष्विति॥सौरेव्र
तेतुसायान्हव्यापिनीनप्रदोषगेति॥माधवः॥अथप्रदोषे
नक्तंतिथिर्दिनद्वयेचेन्नास्तितदासायंमध्यान्हव्यापिन्यां
दिवैवनक्तंकार्यं॥तदुक्तंस्कांदे॥दिवसस्याष्टमेभागेयदा
मंदायतेरविः॥तन्नक्तंनक्तमित्याहुर्नतक्तंनिशिभोजनं॥य
तेर्नक्तंकालमाह॥नक्षत्रदर्शनान्नक्तंगृहस्थस्यबुधैःस्मृतं॥
यतेर्दिनाष्टमेभागेतस्यरात्रौनिषिध्यते॥इतियतिगृहस्थ
योर्नक्तंकालः॥उपवासस्ययःकालःसएवायाचितव्रते॥इ
तिनक्तंकालनिर्णयः॥॥अथनक्षत्रोपवासनिर्णयः॥उपो
षितव्यंनक्षत्रंयेनासंयातिभास्करः॥यत्रवापुष्यतेरामनि
शीथशशिनासहेति॥विष्णुधर्मोत्तरे॥यद्यहोरात्रादर्वा
कतुनक्षत्रंप्राप्यतेतिथौ॥तन्नक्षत्रेव्रतंकुर्यात्तदंतपा

॥७॥

रलंभवेत्॥यदादिनद्वयेस्तमयसंबंधितदापूर्वैव॥दि
नद्वयेपिनास्तमयसंबंधितदापिपूर्वैव॥उदयेत्रिमुहूर्ते
स्थेनक्षत्रंव्रतदानयोः॥श्रावणेतूत्तरंग्राह्यमुपवासा
दिकर्मसु॥॥अथदानव्रतयोस्तिथिनिर्णयमाह॥॥सो
दयेत्रिमुहूर्तायांकुर्याद्दानंव्रतानिच॥उभयत्रतथावे
तुपूर्वेद्युस्तदनुष्ठितः॥परत्रेनतथावेचपूर्वाग्राह्यातिथि
क्षये॥तिथेःसाम्येथवाद्वौचगृह्यतामुत्तरातिथिः॥इयु
पवासेदैवेषदुकारतिथिनिर्णयः॥एकादिष्टपार्वण
योर्निर्णयमग्रेवक्ष्यामि॥॥अथसामान्यतःसर्वतिथिनि
र्णयः॥कालनिर्णये॥तिथिःसंपूर्णाखंडाचेतिद्विधा॥
संपूर्णायांनसंदेहः॥स्कांदे॥प्रतिपत्प्रभृतयःसर्वा
उदयादुदयंरवेः॥संपूर्णाइतिविख्याताहरिवासर

वर्जिता इति॥ दिनद्वयसंबंधिनी खंडा तस्याः नि
र्णयमाह॥ शुक्लास्याः प्रथमा चेत्सा भवेद्या चापराह्णिकी
ति स्कंदपुराणवचनादपराह्णव्यापिनी पूर्वविद्धा प्रति
पद्ग्राह्येत्यर्थः॥ शुक्लात्तूत्तरतो खिलेति॥ शुक्लासर्वा प्र
तिपदपराह्णगा उत्तरविद्धा ग्राह्येत्यर्थः॥ ॥ अथ द्वितीं
यानिर्णयः॥ प्रतिपत्संमुखा कार्या द्वितीया प्रतिपद्यु
तेति॥ सामान्येन प्रवृत्तस्य वाक्यस्य शुक्लपक्षे तिथिगा ॥८॥
॥८॥ ह्या॥ यस्यामस्तमितो रविरित्यनेन मार्कंडेयपुराणवच
नेन समानार्थत्वेन शुक्लाद्वितीया विषयत्वेसति॥ प्रति
पत्संमुखा कार्या भवेद्या चापराह्णिकी॥ पूर्वाह्णिकी च
कर्तव्या द्वितीया विषयत्वे सति॥ पि च तादृशी ति स्कंद
पुराणवचनेन पूर्वाह्णगायाः शुक्लद्वितीयायाः पूर्व

विद्धत्वमुक्तं॥ सितात्परतः सर्वेति॥ युग्माग्नियुगभूतानां
षण्मुन्योर्वसुरंध्रयोः॥ रुद्रेणद्वादशीयुक्ता चतुर्दश्या च पू
र्णिमा॥ प्रतिपच्चप्रमावास्ये तिथ्योर्युग्ममहाफलमिति॥ यु
ग्मवाक्यात्सिताः सर्वाः पराः कार्या इत्यर्थः॥ ॥ अथ तृतीया
निर्णयमाह॥ रंभान्योत्तरत इति॥ तथा च ब्रह्मवैवर्ते॥ रंभा
रव्यां वर्जयित्वा तु तृतीया द्विजसत्तम॥ अन्येषु सर्वकार्येषु ग
णयुक्ता प्रशस्यते॥ गणश्चतुर्थी॥ अथ चतुर्थीनिर्णयमाह॥
॥ ॥ विनायकव्रतव्यतिरिक्ताया श्चतुर्थ्याः परविद्धत्वमुक्तं ६८
ब्रह्मवैवर्ते॥ तृतीयासंयुता चार्थे चतुर्थी सा फलप्रदा॥ क
र्तव्या व्रतिभिर्वत्स गणनाथसुतोषिणी॥ गणनाथं सुतरां
षोतोषयतीति गणनाथसुतोषिणी॥ इति कालनिर्णयका
रैरीरितं॥ अत्र माधवस्त्वन्यथा व्याचक्षते॥ चतुर्थी

तुपरोपोष्यागणनाथव्रतस्य तु॥ मध्याह्नव्यापिनीपूर्वा
द्वन्नात्तु गचतुर्थ्यपि॥ चतुर्थीगणनाथस्य माघविद्धा प्रश
स्यते॥ मध्याह्नव्यापिनी चेत्सा परतश्चेत्सरेहनीफविद्धोत
रा कृत्वा॥ अन्यथा पूर्वविद्धैव माघयोगप्रशस्तितइति॥
पूर्वेद्युरेवतद्ध्यात्वा पूर्वा सप्रयातिथिः॥ नो चेत्सर्पस्य पं
चम्यां योगो यंतप्रशस्यते॥ गौर्याशुद्धतयाप्यस्तु नागवि
द्धा निषिद्धा तइति॥ विनायकव्रतनागव्रत व्यतिरिक्त च
तुर्थ्यपरैवोपोष्या॥ तयोस्तु व्रतयोर्मध्याह्नव्यापिनिर्णै
यः॥ ॥ अथ पंचमीनिर्णयः॥ कल्ला पूर्वयुता सिता परयु
तेति दीपिकोक्तेः॥ तदुक्तं स्कंदे॥ पंचमी तु तथा कार्या च
तुर्थ्या सहिता विधौ॥ इति वचनेन कल्ला पूर्वा॥ पंचमी
तु प्रकर्तव्या षष्ठ्या युक्ता तु नारद इति ब्रह्मवैवर्तवचनात्तु

॥९॥

कल्ला परेति भावः॥ ॥ अथ षष्ठीनिर्णयः॥ ॥ षष्ठी तु
सर्वदा परैव॥ नागविद्धा न कर्तव्या षष्ठी चैव कदाचन॥ षष्ठ्या
युता तु कर्तव्या सप्तमी तात सर्वदा॥ षष्ठी च सप्तमी यत्र तत्र
सन्निहितो हरिरिति वचनेन सप्तमीषष्ठीसंयुतैव कार्या॥
॥ ॥ अथाष्टमीशुक्ला कल्ला परेत्याह निर्णये॥ ॥ पूर्वविद्धा
प्रकर्तव्या परविद्धा न कर्हिचित्॥ शिवरात्र्योरसत्वपक्षे
तस्याः परविद्धत्वं मुक्तं ब्रह्मपुराणे॥ अष्टम्या नवमीविद्धा
नवम्या चाष्टमीयुता॥ अर्द्धनारीश्वरो योगो उमामाहेश्व
रीतिथिः॥ अष्टमीनवमीयोगो महोत्साहो महोत्सवः॥ शि
वरात्र्योः शिवक्षेत्रपक्षयोरपि योरपीति वचनाद्युग्म
वाक्याच्च नवम्यपि पूर्वयुतैव॥ न कुर्यान्नवमी तात दश
म्यां तु कदाचनेति॥ देशम्यादिदिनत्रयनिर्णयमग्रे

वक्ष्यामि॥अथ चतुर्दशीपक्षद्वयेप्यपराह्णव्यापिनीकु
र्यात्॥दिनद्वयेपराह्णगायाःपूर्वविद्धत्वमाह॥चतुर्दशी
तुकर्तव्यात्रयोदश्यायुताविधौ॥ममभक्तैर्महाबाहो
सर्वेद्याचापराह्णिकीतिस्कंदपुराणवचनात्॥अपरा
ह्णव्याप्त्यापाक्वैचैत्रश्रावणव्यतिरिक्तशुक्लातृतीयाव्य
क्तापूर्वेतिकालनिर्णयदीपिकाकारः॥नोचेच्चैत्रनभो
गतेतरसितास्यादूर्ध्वमाघासितेति॥॥अयंचप्रति
पदादिसर्वतिथिनिर्णयःसामान्येनोक्तः॥सपित्र्यक
र्मव्यतिरिक्तोपवासव्रतादिषुज्ञेयः॥॥तथा॥खर्वोद
र्पस्तथाहिंसात्रिविधंतिथिलक्षणं॥खर्वदर्पौपिरो
पुद्यौहिंसास्यासूर्यकालिकी॥खर्वः साम्यं॥दर्पोवृद्धिः॥
हिंसाक्षयः॥कर्मलोपस्यपःकालस्तत्कालव्यापिनीति

॥१७०॥

थिः॥तत्रैयोमीलिकुर्वतिह्रासवृद्धीनकारणं॥यदेक
स्मिन्दिनेव्रतादिकर्मकालगानान्यस्मिन्दिनेतदाक
र्मलोपस्यपःकालइत्यादिवचनात्कर्मकालगेवग्राह्ये
त्यर्थः॥आहकालनिर्णयदीपिकाकारः॥अथसमे
यत्रैकवाक्यवेद्धकासाखलुशस्यतेव्रततिथौयुग्मा
भिधाचेतरेति॥अथदिनद्वयेप्यव्यापिनीकर्मकालति
थिस्तदा॥यांतिथिंसमनुप्राप्यउदयेयातिभास्करः॥
सातिथिःसकलाज्ञेयास्नानदानव्रतादिषु॥॥तथा
विष्णुधर्मोत्तरे॥उदितेदेविकर्मानोपित्र्यंवास्तमिते
रवौ॥द्विमुहूर्तेत्रिरात्रश्चसातिथिर्हव्यकव्ययोः॥भा
स्करोदितेसतिअहोमुहूर्तद्वयंदेवपरं॥रवौअस्त
मितेसतिअहस्त्रिमुहूर्तंपित्र्यं॥अतस्तत्कालव्यापि

नीतिथिर्ग्राह्येत्यर्थः॥दिवसव्रतेरात्रिव्रतेचयुग्मस्या
नादरेणतद्युक्तग्राह्येत्यर्थः॥जाबालिः॥अहःस्वतिथ
यःपुण्याःकर्मानुष्ठानेतुदिवा॥नक्तादिव्रतयोगेषुरा
त्रियोगोविशिष्यते॥अहोरात्रसाध्यव्रतेतुअहोरा
त्रव्यापिनीग्राह्येत्याह॥यास्कवल्क्यः॥दिवारात्रौव्रतं
यच्चएकमेवतिथौगतं॥तस्यामुभययोगिन्यामाचरे
तद्व्रतंव्रतीति॥यदायुग्मदिनेऽस्तमयसंबंधिनीअ
युग्मदिनेतूदयास्तमयसंबंधिनीतदाउभयसंबंधि
न्याःप्राशस्त्यात्सैवग्राह्येत्याह॥कालनिर्णयेपि॥अश्व
प्रास्तमयोदयस्पृगितरांयुग्माभिधांतांत्यजेत्॥इत
राउदयास्तमयसंबंधिव्यतिरिक्तयुग्माभिधामवंतु
तामित्यजेदित्यर्थः॥अनेनोदयास्तमयसंबंधिन्याः

डाक्टर भाऊदाजी हरिशास्त्री मेमोरियल
DR BHAU DAJI MEMORIAL

प्राशस्त्यमुक्तं॥युग्मदिनेव्रतप्राप्तौप्रातरेवसंकल्पइ
त्याह॥प्रातःसंकल्प्यहिदानुपवासव्रतादिषु॥इति
वचनात्॥अन्यत्रयुग्मदिनेविहितातिथेःप्रारंभतसं
कल्पंकुर्यादित्यर्थः॥शुक्लपक्षेरविदिनेप्रवृत्तेचोत्तराय
णे॥पुनामध्येचयनक्षत्रेगृह्णीयात्सप्तमीव्रतमि
त्यादिवचनैःसप्तम्यादिकालेसंकल्पश्रवणादितिभावः॥
यदिव्रतविशेषेणसंकल्पकालेविशेषोनोक्तस्तदातत्काले
संकल्पंकुर्यादित्यर्थः॥अन्यच्च॥वसिष्ठः॥पारणेमर
णेचैवतिथिस्तात्कालिकीस्मृता॥पित्र्येस्तमयवेला
यांस्पृष्टापूर्णानिगद्यते॥स्कांदे॥अभ्यंगेचोदधिस्ना
नेदंतधावनमैथुने॥जातेचमरणेचैवतत्कालव्यापि
नीतिथिः॥मन्वादौचयुगादौचग्रहणेचंद्रसूर्ययोः॥

व्यतीपाते च वैधृत्यां तत्कालव्यापिनी क्रियेति ॥ इति
सर्वशास्त्रार्थसंग्रहे सामान्यतः सर्वतिथिनिर्णयः ॥ अथ
व्रतविशेषे तिथिनिर्णयः ॥ अत्र निर्णये ॥ होलीका
वटपेटकी बलिदिनं वह्निव्रतोक्ततिथिर्दूर्वारथा
सहृतपाचनवमी दूर्वाव्रते आवली ॥ षष्ठी स्कंधयु
ता त्रयोदशतिथिः कामस्य चैत्राष्टमी येताः पूर्वयुता
व्रतेषु तिथयो ग्राह्यास्तथा रोहिणी ॥ ॥ बलिदिनं
बलिप्रतिपत् ॥ दूर्वा स्याद्दूर्वाष्टमी ॥ सहृतपा हृतपा
संबंधिनी तिथिः ॥ आवली आवलमास्यपूर्णिमाह
ताः पूर्वा ॥ अथ विशेषतिथिनिर्णये संवत्सरप्रतिप
न्निर्णयः ॥ अखंडितायां नास्ति संदेहः ॥ खंडा चेत्परे
साह ॥ नंदा संवत्सरादौ तु दर्शे विद्धा न कर्हिचित् ॥

॥१२॥

॥१२॥

परिविद्धा न प्रकर्तव्या त्रिमुहूर्ता यदा भवेत् ॥ मुहूर्तम
पि कर्तव्या प्रतिपद्द्वितयान्विता ॥ तदुक्तं भविष्योत्तरे ॥ या
शुक्ला चैत्रमासस्य वत्सरादितिथिः स्मृता ॥ मुहूर्तद्वि
तयं चेत्तु मुहूर्तं वा यदा भवेत् ॥ वर्तते वासरे यस्मिन् प्रा
तः सोऽहः पतिर्भवेत् ॥ रत्नावल्यां ॥ बहुभिः कीर्तितो रा
जा रवेरुदयकालिकः ॥ यत्र भूपद्वयं दृष्टौ भूमा परा
वस्तिथिस्तयोः ॥ उक्तं च नारदसंहितायां ॥ उदयद्वित
येपि पूर्वा नोदययुगलेपि पूर्वा स्यात् ॥ इति वाक्यपूर्व
वाक्यविरोधे प्राप्ते तद्विरोधपरिहारायोक्तं गर्गसंहि
तायां ॥ अमाप्रतिपदोः संधिमुहूर्तो यदि तत
दा तद्दिनयोराद्यापरतश्चेत्परेहनीति ॥ तेन यं प्रतिप
दुदयो व्यापिनी ग्राह्येत्यर्थः ॥ दिनद्वयेतद्व्याप्ताव

व्यासौवापूर्वैव॥चैत्रनवरात्रेतुद्वितीयायुतैव॥अत्र
तैलाभ्यंगोनिषेधः॥चैत्रेमलमासेतुवत्सरारंभोमलमा
सेकार्यइत्येके॥शुद्धएवेत्यपरे॥अस्यामेवप्रपादानं॥
॥॥इतिप्रतिपन्निर्णयः॥॥अथगौरीहृतीयानिर्ण
यः॥इयंमन्वादिरपि॥चैत्रशुक्लहृतीयायांगौरीताव
त्पूजयेत्॥नारीभिर्भक्तिसंयुक्तंयावन्मासोभवे
दिह॥ब्रह्मवैवर्ते॥दोलामारोहयेद्देवींशंकरेणस ॥१७॥
मन्वितां॥पूजयेन्मासमात्रंतुनारीसौभाग्यमिच्छति॥
इयंहृतीयापरेसाह॥स्कंदः॥चतुर्थीसंयुताहृतीवहृती
यासाफलप्रदा॥अवैधव्यकरीस्त्रीणांपुत्रपौत्रप्रव
र्द्धिनी॥माधवेपि॥रंभाहृतीयापूर्वास्यादुत्तरास्या
द्वतांतरे॥मुहूर्तमात्रसत्वेपिदिनेगौरीव्रतंपरेति॥

रंभाख्योवर्जयित्वातुहृतीयांद्विजसत्तम॥अन्यत्रसर्वका
र्येषुगलयुक्तांप्रशस्यते॥शुद्धाधिकायामप्येवगलयुक्तांप्रश
स्यते॥गलश्चतुर्थीतिथ्युक्तांकार्यस्यर्थिः॥इतिगौरीहृतीया
निर्णयः॥॥चैत्रशुक्लनवम्यांतुरघुनाथंप्रपूजयेत्॥य
तोमध्याह्नवेलायांसोजातोहिजगद्धितः॥इयंनवमीखंडा
चेन्मध्याह्नव्यापिनीपरेवेत्याह॥संग्रहे॥नवमीचाष्टमीवि
द्धाउपोषणेनवम्यांतुदशम्यांचेवपा
रणे॥वशिष्ठः॥श्रीरामजन्मनवमीसंपूर्णायदिसोतमा॥
खंडाचेत्परविद्धैवकर्तव्यामतिसंयुतैः॥द्वयोर्मध्यंदि
नेप्राप्तिःकर्तव्यापरसंयुतेति॥तथाचोक्तमगस्तिसंहितायां॥
चैत्रेनवम्यांप्राक्यद्देवीपुष्येपुनर्वसौ॥उदयेगुरुगौरी
शस्याद्यस्येग्रहपंचके॥मेषपूषणिसंप्राप्तेलग्नेकर्कटका
दये॥आवीरासीत्सकलयाकौशल्यापरपुमान्॥तस्मि

न्दिने तु कर्तव्यमुपवासव्रतादिकं ॥ तत्र जागरणं कु
र्याद्घुनाथपरो भुवीत्यादि ॥ सदेत्यादि श्रवणाद्भक्तस्य नि
यो तोक्तौ ॥ तथा चतत्रैव ॥ यस्तु रामनवम्यां तु भुंक्ते मोह
द्विमूढधीः ॥ कुंभीपाकेषु घोरेषु पच्यते नात्र संशयः ॥ कुर्या
द्रामनवम्यां तु उपोषणमतद्धितः ॥ मातुर्गर्भं न वाप्नोति स
चरामो भवेत्स्वयमित्यक्षरलप्रत्यवायं मोक्षफलकत्वयोः
श्रवणात् ॥ तत्र नवमी द्विविधा ॥ शुद्धाष्टमीविद्धा चेति ॥ शु
द्धापि विद्धा नक्षत्रसहिता तद्रहिता चेति ॥ तत्र सनक्षत्रा
तमा ॥ चैत्रशुक्लेतु नवमी पुनर्वसुयुता यदि ॥ श्रीरामनवमी
प्रोक्ता कोटिसूर्यग्रहाधिका चेति अगस्त्यस्मरणात् ॥ से
वमध्याह्ने पुनर्वसुयोगे प्रशस्ततमा ॥ सेवमध्याह्नयोगे
न महापुण्यतमा भवेदिति तस्यैव स्मरणात् ॥ एवं शुद्धापि

त्रिधा ॥ यत्र मध्याह्ने पुनर्वसुयुक्ता नवमी भवती सोपोष्या
सेवमध्याह्नेऽनंतरोक्तवचनात् ॥ तदसंभवे यत्रक्वापि पु
नर्वसुयुक्तोपोष्या ॥ पुनर्वसुसंयोगः स्वल्पोपि यदि
दृश्यते ॥ चैत्रे शुक्लनवम्यां तु सातिथिः सर्वकामदेति स्मरणा
त् ॥ तस्याप्यसंभवे नवमीमात्रमुपोष्यं ॥ चैत्रशुक्लनवम्यां
तु कर्तव्यं व्रतमुत्तमं ॥ तस्मान्नृदिने महापुण्ये जातो रामः
स्वयं हरिः ॥ तस्मात्सर्वात्मनो कार्यं रामसुद्दिश्य भक्तितः ॥
उपोषणं जागरणं पि हनुद्दिश्य तर्पणमित्यादि श्रवणात् ॥
विद्धापि द्वादशधा ॥ पूर्वद्युरेवमध्याह्नव्यापिनी परद्यु
रेवमध्याह्नव्यापिनी उभयत्र नोभयत्र साम्यं नवेपम्य
नैकदेशव्यापिनी तिथाद्या ॥ सेवपुनर्वसुयोगात्प्र
सेकं द्विधेति ॥ तत्राद्ये नक्षत्रसंभवे सेवोपोष्या ॥ तदसं
भवे मध्याह्नव्याप्तिं विहायापि यत्रयोगस्तेवपुन

वैस्पृक्षसंयोगेऽद्यस्यात्रापिसमानत्वात्॥एवंद्वितीयेपि॥
तृतीयपक्षेतूभयत्रयोगेपरैव॥नवमीचाष्टमीविद्धाया
ऽरामपरायणैः॥उपोष्यानवम्यांवेदशम्यांपारणंभ
वेदितिपूर्वनिषेधात्॥पूर्वद्युरेवनक्षत्रयोगेतुसाप्यु
पोष्याप्रशस्यात्॥निषेधस्योभयत्रयोगपरत्वसंभवा
त्॥एतेनअष्टमीविद्धासनक्षत्रापिनोपोष्येति॥माध
वोक्तिरप्युक्तविषयैव॥चानुर्थपरैवपूर्वत्रनिषेधा
त्॥परत्रव्रतोपवासनियमेघटिकैकापियाभवेदिति
विधानाच्चतत्रापिपूर्वत्रैवनक्षत्रयोगसैव॥पुनर्व ॥१५॥
स्पृक्षसंयोगइतिवचनात्॥एवंचमपरैवोदयिकत्वात्॥
तत्रापिपूर्वनक्षत्रयोगपूर्वोक्तवचनात्॥षष्ठेवृद्धि
कोपोष्यातत्रापिनक्षत्रयोगस्यल्पापीति॥॥इतिरा
मनवमीनिर्णयः॥॥अथपारणानिर्णयः॥सा

॥१५॥

वतिथिनक्षत्रनियमेतिथिप्रांतेचपारणमितिवचनाद्
भयोपवासेउभयांतएवतिथिमात्रोपवासेचतुर्दशीपा
रणंभवेदितिवदनातिथ्यंतएव॥परत्रासायंतिथिसत्वे
पूर्वत्रोपवासप्राप्तौतुपरेद्युरात्रौपारणप्रसंगइत्यलं॥इ
तिपारणानिर्णयः॥॥अथचतुर्दशीपर्वनिर्णयः॥॥
इयंसायंकालव्यापिनीकार्ययुक्ता॥संग्रहे॥मधोःश्राव
णमासस्यशुक्लपक्षेचतुर्दशी॥सारात्रिव्यापिनीग्राह्या
नान्याशुक्लाकदाचनेति॥अत्ररात्रिशब्देनसायंकाल
व्यापिनीग्राह्येयर्थः॥अर्थाद्दिनद्वयेचेत्सायंकालव्या
पिनीतदापरा॥तदुक्तंयुग्मवाक्ये॥युग्माग्निर्युगभूता
नांषण्मुन्योर्वसुरंध्रयोः॥रुद्रेणद्वादशीचतुर्दश्याच
पूर्णिमयादिवचनयोगात्सायंकालव्यापिनीग्राह्येयर्थः॥

सायंकालव्याप्तस्तु सूर्यास्तानंतरं प्रथममुहूर्तात्मके ति॥ नि
त्यं संपूजयेद्देवीं नवरात्रोक्तमार्गतः॥ षष्ठीमारभ्य कृतातं नव
रात्रमुपोषितः॥ ॥ अथ पूर्णिमापर्वनिर्णयः॥ कृतविद्धेन क
र्तव्येदर्शपूर्णे कदाचन॥ वर्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमु
त्तमम् इति वचनात् इयं परैव मध्याह्नव्यापिनी ग्राह्या॥ दिवपू
जायाः मध्याह्नव्यापित्वमुक्तमस्ति॥ अस्यां सर्वदेवान् दमनक
नाम्न्यर्चनात् संवत्सरपर्यंतकृतपूजायाः फलं प्राप्नोतीत्यु
क्तं लिंगपुराणे॥ मधुमासे चतुर्दश्यां पौर्णमास्यां नराधिप॥ द
मनेन कृतां पूजां संवत्सरकृतां भवेत्॥ श्रावणमासस्य पूर्णि
मातुपूर्वमध्याह्नव्यापिनी॥ तदुक्तं कालनिर्णये॥ श्रावणी
दुर्गनवमी दूर्वा चैव कुशा तथा॥ पूर्वविद्धा प्रकर्तव्या त्रिव
रात्रिर्बलेर्दिने इति॥ तेन यं पूर्णिमा श्रावणी कुशा तथा नि

॥१९६॥

॥१९६॥

व्यतिरिक्तास्त्रिमुहूर्ता चेत्सरान्यथा पूर्वा॥ इति पूर्णिमापर्वनिर्णयः॥ अथ परशुरामजयंतीनिर्णयः॥ ॥ वैशाखे शुक्लपक्षस्य तृतीयायां जनार्दनः॥ ब्रह्मलोकात्सर्वे विष्णुः पृथिव्यां प्रबभूव ह॥ यवानुत्पादयामास रवौ मध्यदिने सती ति॥ तेन यं परशुरामस्य जयंती उच्यते बुधैः॥ नारदीये॥ वैशाखे शुक्लपक्षे तु तृतीया रोहिणीयुता॥ दुर्लभा बुधवारेण सोमेनाथ शुभा भवेत्॥ इत्यादिवाक्यैः कर्मकालव्यापिनी तिथिर्बुधैः रोहिणीयोगादसंतं प्रशस्ता॥ दिनद्वये चेत्कर्मकालव्यापिनी अव्यापिनी वा तदा परयुक्ता ग्राह्या॥ भविष्ये॥ रोहिणीबुधयुक्तापि पूर्वविद्धा परित्यजेत्॥ विनापि रोहिणीयोगा सुख्या कोटिगुणा परा ति॥ नारदीये॥ पूर्वविद्धा दिनद्वयं किंचिन्मूलं तु वै॥ न वेद्धा तिथिकुंडपूजा तद्दिने संभवामि ति॥ इति परशुरामजयंतीनिर्णयः॥ ॥

इदानीं श्राद्धे निर्णयः कथ्यते। वैशाखे शुक्लपक्षे तृतीया हि पौ
र्णमासी युता। दुर्लभा बुधवारेण सोमेनापि युता तथेति। रोहिणीबु
धयुक्तापि पूर्वविद्धा विवर्जयेत्। मकरस्थे तपि माघे तः पुण्य
हंति पुरा स्मृतं। गौरी विनायकोपेता रोहिणीबुधसंयुता। विनो
पि रोहिणीयोगात् पुण्यकोटिगुणा परा। अमामन्वादियुगादितिथ
तिपातमहालयाः। अन्वष्टकाश्च पूर्वेद्युः एतेषु वर्ज्यो हि कालस्तथा
इयं युगादिरपि। सा चोक्ता रत्नमालायां। माघे पंचदशी स्नाना
नभस्ये त्रयोदशी। तृतीया माधवे शुक्ला नवम्यूर्जे युगादय
इति। अत्र श्राद्धमुक्तं मात्स्ये। एतत् श्राद्धं विधानेन मन्वादिषु युग
आदिषु। हायनानि द्विसाहस्रं पितॄणां दत्तमेव हि। ॥१७॥
भारते पि। यामन्वाद्या युगाद्याश्च तिथयस्ता सुमानवः।
स्नात्वा कुशोदकेन दत्वा जप्त्वा अनंतफलं भवेदिति। श्राद्धे पि पू

॥१७॥

र्वाह्णव्यापिनी ग्राह्या। पूर्वाह्णे तु सदा कार्या शुक्लाभ्युदयादयः। देवे कर्मणि पित्रे च सप्तम्यां चैव पराह्णिकी इति पा
क्तः। द्वे शुक्ले द्वे तथा सप्तम्यादिकवयो विदुः। शुक्ले पूर्वाह्णि
क्या ह्येव सप्तम्यां चैव पराह्णिकी। तिथेर्मासे दीयते वचनाच्च
दीपिकापि। अथो मन्वादियुगादिकर्मतिथयः पूर्वा
ह्णिकास्युः तिथे विज्ञेया अपराह्णिकाश्च बहुले। स्मृत्यर्थ
सारेपि। युगादिमन्वादिश्राद्धेषु शुक्लपक्षे उदयव्यापिनी
तिथिर्ग्राह्या। बहुलपक्षे अपराह्णव्यापिनीति। दिनद्वय
सत्वे परेव तिथिर्धर्मतत्त्वविदो हेमाद्रयः। अनंतफ
दस्तु। सर्वे तिथयो तीपातो युगमन्वादयस्तथा। संमु
खा उपवासेषु दानादावंतिमा स्मृता इत्याह। दानादा
दाविसापि तिश्राद्धसंग्रहः। अत्र विशेषो हेमाद्रौ

विष्णो॥वैशाखे शुक्लपक्षे तु तृतीयायां तथैव च॥गंगातो
यनरः स्नात्वा मुच्यते सर्वकिल्बिषैः॥तस्यां कार्यं यवैर्होमो
यवैर्विष्णुं समर्चयेत्॥यवान्दद्याद्द्विजातिभ्यो प्रयत्न
प्राशयेद्यवानिति॥अत्रैव दानविशेषस्तत्रैव भविष्ये॥
इमां प्रक्रम्य॥उदकुंभान्सक्तूंश्च सान्नान्सर्वफलान्वित
न्॥यवगोधूमकलकान्सतुदध्योदनंतथा॥ग्रीष्मिकं स
विमेवात्र सस्यदानं प्रशस्यते इति॥देवीपुराणे॥तृ
तीयायां तु वैशाखे रोहिण्यर्क्षे प्रपूजयेत्॥उदकुंभप्रदानेन
शिवलोके महीयते॥मंत्रस्तु॥एष धर्मघटोदत्तो ब्रह्म
विष्णुशिवात्मकः॥अस्य प्रदानात्प्रीयंतु पितरोपि पिता
महः॥गंधोदकतिलैर्मिश्रं सान्नं कुंभं सदक्षिणं॥पि
तृभ्यः संप्रदास्यामि ह्यक्षय्यमुपतिष्ठतु॥अत्र पिंडर
हितं श्राद्धं कुर्यात्॥युगादिषु च सर्वासु पिंडनिर्वप

॥१८॥

BHAU DA

णाद्दृतइति॥तस्मात्तृतीयानपूर्वा निषेध्या अवलात्॥तदु
क्तं स्कंदपुराणे॥वैशाखस्य तृतीयां तु पूर्वविद्धां करोति यः॥
हव्यदेवानगृह्णंति कव्यं चैव पितामहः॥यत्र देवानगृह्णं
ति कव्यं तत्र पितामहाः॥तस्मात्सर्वप्रयत्नेन पूर्वविद्धां विव
र्जयेत्॥करोति यदि तां मोहात्सेतत्वं यांति॥भविष्ये॥पूर्वविं
द्धा तृतीया यां वैशाखे मुनिसत्तमाः॥हव्यं कव्यं न भिर्दत्तं पू
र्वविद्धा क्षयातिथौ॥गौतमः॥पूर्वविद्धा तृतीया यां यद्दत्तं स
लिलं सुतैः॥रुधिरं तद्भवेत्सर्वं पितृणां नोपतिष्ठति॥तस्मा
त्प्रयत्नेन राजन्पूर्वविद्धां विवर्जयेत्॥करोति यदि तां मो
हात्सेतत्वं यांति पूर्वजाः॥नोद्धरंति कृतैः पुत्रैः बहुभिस्त
त्सेवितैः॥इत्यादिबहुक्यसंकोचप्रसंगात्पूर्वविद्धा निषि
द्धा॥नारदः॥वैशाखे शुक्लपक्षे तु तृतीया रोहिणीयुता

दुर्लभा बुधवारेण चतुर्थी संयुता तथा ॥ एवं कदाचिल
भ्ययोग प्राप्तास्याद्द्वितीयायुक्तापि स्यात् ॥ मैवं ॥ रोहिणी
बुधयोगेपि पूर्वयुक्ता न ग्राह्या ॥ तदुक्तं स्कंदपुराणे ॥ वैश्ण
रवस्पृष्टतीयां तु पूर्वविद्धां न शोभनाः ॥ कुर्यं देवानगृह्णंति
कुर्यं चैव पितामहाः ॥ यत्र देवानगृह्णंति कुर्यं तत्र पितामहाः ॥
तस्मात्सर्वप्रयत्नेन पूर्वविद्धां विवर्जयेत् ॥ भविष्ये ॥ पूर्ववि
द्धा तृतीया यां वैशाखे मुनिसत्तमाः ॥ हुर्यं कुर्यं न कर्तव्यं
तत्सर्वं निःफलं भवेत् ॥ पानीयं रुधिरं भूत्वा पितॄणामुपति
ष्ठति ॥ अन्नं मांसमयं दत्तं पूर्वविद्धां क्षयातिथौ ॥ गौतमः
पूर्वविद्धा तृतीया यां यद्दत्तं सलिलं सुतैः ॥ रुधिरं तद्भवेत्स
र्वं पितॄणां नोपतिष्ठति ॥ तस्मात्प्रयत्नेन तां राजन् पूर्वविवर्ज
येत् ॥ ७ ॥ इति पुनर्भूः ॥ ॥ तदुक्तं स्कंदपुराणे ॥ रोहिणी बुध

॥१९॥

सुक्तापि पूर्वविद्धा तिथिर्निंदिता ॥ मत्स्यालता सामोहाद्ब
हुतिपुण्ये पुराणतमिति ॥ नन्वेवमलक्ष्ययोगसद्भावे
उत्तरविद्धा नोचेत्पूर्वविद्धा न ॥ रोहिणीबुधयोगः प्रा
योनुवादः ॥ केवलचतुर्थीयुक्तैव तृतीया पूज्या ॥ तदुक्तं
देवीपुराणे ॥ गौरीविनायकोपेता रोहिणीबुधसंयुता
विनापि रोहिणीयोगा मूल्यकोटिफलप्रदेति ॥ एवं सर्व
वाक्यपर्यालोचनया विरोधाभावाद्देवपित्र्येचक
र्मणी चतुर्थीयुक्तापि तृतीया पूज्या ॥ ॥ इति अक्षय्य
तृतीयानिर्णयः ॥ ॥ ७ ॥ अथ नृसिंहजयंतीनिर्णयः ॥
नृसिंहप्रसादे व्यासवचने ॥ शुक्लपक्षे चतुर्दश्यां मा
सि माधवसंज्ञके ॥ सायंकाले समासंभे प्रादुर्भूतो नृ
केसरीति वचनेन सायंकालव्याप्तिर्ग्राह्येत्यर्थः ॥

यदि दिनद्वये चे सायंकालव्यापिनी अव्यापिनी वा तदा
सायान्हव्यापिनी परयुक्ते सुक्ते ॥ तत्रैव ॥ चतुर्दशी नृसिं
हस्य सायंकालोद्भवे ॥ अव्यापिनी व्यापिनी वा तदा दोषाध्या
पराजिता इति ॥ पूर्णायुक्तानुकर्तव्या नरसिंहस्य तुष्टये ॥
तदुक्तं स्मृतिसिंधौ ॥ वैशाखशुक्लचतुर्दश्यां श्रीनृसिं
हपुराणे ॥ नरसिंहजयत्यां व्रतं कुर्यादतंद्रितः ॥ वै
शाखे शुक्लपक्षस्य चतुर्दश्यां विवस्वति ॥ अस्तंगमिमि
सर्वेषां पुरस्तंभस्य मध्यतः ॥ प्रादुर्बभूव महाविष्णुर्नरसिं
हाकृतिर्नृप ॥ तस्यां व्रतं नरैः कार्यं महाविष्णोरतिप्रि
यं ॥ शनिवारयोगे वृद्धिं नक्षत्रयोगे न भूमिप ॥ महा
जयंती विख्याता दुर्लभा व्रतिनामिह इति ॥ योगकरणे
अपि तत्रैव ॥ सिद्धियोगस्य संयोगे वलिजे करणे तथा ॥

दिन ३

॥२०॥

तथा ॥ पुण्यं सौभाग्ययोगे न लभ्यते दैवयोगतः ॥ सर्वैः
तिस्तु संयुक्ते हत्याकोटिविनाशनं ॥ एतदन्यतरे योगे तदि
नं पापनाशनं ॥ केवलेन हि कर्तव्यं मद्दिने व्रतमुत्तमं ॥ अ
न्यथा नरकं याति यावच्चंद्रदिवाकरावितिः ॥ भविष्य
पुराणेपि ॥ राधे शुक्लचतुर्दश्यां शुद्धो वलिजवायुभ
मंदवारे नृसिंहो भूत्रेतायां चादिकल्पके ॥ सायंकालेस
दा तं रक्षादमनकारणात् ॥ एष पुण्यतमो योगो दिवासिं
हो दयाद्भयः ॥ प्राप्तः सुदुर्लभतरो धर्मकामार्थमोक्षदः ॥
अर्द्धोदया नामयुतं न चास्याहतिवैकलं ॥ प्राधान्येन
तिथिः पूर्णा कृतुस्यादिसंयुता ॥ चतुर्णामपि वर्णानां
व्रतेस्मिन्नधिकारितेति ॥ तच्च नित्यं ॥ वर्षे वर्षे तु कर्तव्यं
मम संतुष्टिकारकं ॥ महाशुभमिदं श्रेष्ठं मानुषैर्भवभीरु
भिरितिवीप्सा अवलात् ॥ तेनैव क्रीयमाणेन सहस्रद्व

दशीफलं॥जायंतेमत्स्यसादृश्यमानुषाणांमहाबलनामि
तिफलंश्रवणाख्यंच॥तत्रचतुर्दश्यांविवस्वति॥अ
स्तंगामिनिप्रभुवर्येनेनसायंकालदर्शनेनचसूर्यास्त
वेलायांविजयमुहूर्तेश्रीनृसिंहप्रादर्भावावगमात्स
र्वव्यापिनीतिथिरंगीकृतिगम्यते॥साचद्विविधा॥शुद्धा
विद्धाच॥तत्रोदयकालमारभ्यास्तकालव्यापिनीशुद्धा॥
विद्धावस्तकालस्पृक्चयोदशीयुक्तेति॥तत्रशुद्धायांन
संदेहः॥शुक्लपक्षेचतुर्दश्यामाश्वमाधवसंज्ञिके॥प्रादु
र्भूतोनृसिंहस्तुतस्मात्तांसमुपोषयेदितिभविष्यपुराणा
त्॥विद्धाचतुर्द्धा॥पूर्वेद्युरेवसायंकालव्यापिनी॥परेद्यु
रेव॥उभयत्रेति॥तत्राद्यपूर्वैव॥चतुर्दशीतुक्रर्तव्यात्रयो
दश्यायुताविभो॥ममभक्तैर्महाबाहोभवेद्याचापरा

॥२२७॥

॥२२७॥

॥नोभयत्रेति
२

लिङ्गीतिस्कांदात्॥द्वितीयेपरेव॥शुक्लाचतुर्दशीग्राह्यापरविद्धा
सदाव्रतेव्यासस्मरणात्॥द्वितीयेपिपरेव॥अनंगेनसमायुक्तासो
पोष्याचतुर्दशी॥पूर्णायुक्तांतुतांकुर्यान्नरसिंहस्यतुष्टयइतिभवि
ष्यपुराणात्॥तत्रैव॥यःकरोतिनरोमोहात्कामविद्धांचतुर्दशीं॥अ
नापयेर्वियुज्येतततस्मात्तांपरिवर्जयेदितिनिषेधाच्च॥चतुर्थ्यामपि
परेव॥यद्यप्यत्र॥सायंतुमंगलाचारःप्रविशेद्धरिमंदिरं॥आरंभे
नव्रतंतत्रस्वस्तिवाचनपूर्वकमितिविहितसायंकालव्याप्तभावान्न
परत्रापियुज्यते॥तथापिप्रातःसंकल्पयद्विद्धानुपवासव्रतादिक
मितिसंकल्पकालेतिथिसत्वाततोमध्याह्नवेलायांनद्यादौविमले
जले॥गृहेवादेवखातेवातडागेवाऽमलेशुभे॥वैदिकेनचमंत्रेण
स्नानंकृत्वाविचक्षणइत्यादिव्रतपूर्वांगकालेचमुख्यतिथिसत्वा
त्स्वधानंकालेपिसातिथिःसकलाद्येयायस्यामभ्युदितोरविरित्याप
दितितिथिसाकल्पेनगौणातिथिसत्वाच्चपरेवाचेतिति॥एतेहेतु

नामन्यतरस्यापि पूर्वत्राप्राप्तात्॥ एवं स्यादिदियोगोप्येकैकत्रे
वविद्यमानो न संदेहपादकः॥ कोऽयंतरप्राप्तात्॥ प्राध्यान्येनति
थिः पूर्णा किंतु स्यादिसंयुतेतिहु भयत्र विद्यमनः परत्रैव ग्राह्यः॥
प्रातः सुदुर्लभतरो धर्मकामार्थमोक्षदइति प्राप्तास्यातिप्रायत
यदा त्वेकत्र रात्रापत्र दिवा योगसद्भावस्तदादिवैव विद्यमानो ग्रा
ह्यः॥ एष पुण्यतमो योगो दिवासिंहोदयाद्भवइति कविख्यातः॥
भयत्रापि यत्किंचिद्व्यस्तयोगसद्भावे यत्रैवाधिकयोगस्तत्रैव॥
एतदन्यतरे योगे तद्दिनं पापनाशनमिति नारसिंहात्॥ तस्यपा
रणातु मध्यान्ने नान्यत्र तद्व्रतः॥ यथा नारसिंहे॥ मध्यान्हे तु
समायुक्तो भ्रातबंधुभिर्नर इति॥ इति नृसिंहजयंतीनि
र्णयः॥ वैशाखे पौर्णिमायां वृषोत्सर्गं कुर्यात्॥ तदुक्तं नारदीये॥
वैशाख्यां विप्रमुख्येयो धर्मप्रीत्यै प्रयच्छति॥ कनकांदोलकं
पत्रैश्चामरादिभिर्भूषितं॥ दिव्यान्नं पायसः पूर्णं स नरः स्व

॥२२॥

॥२२॥

र्गमाप्नुयात्॥ वृषं वा मोचयेद्यस्तु स नरः सुखमेधते॥ संवर्त्तो
वायुपुराणे॥ शीतक्षोदकदध्यन्नं सुवर्णपटसंयुतं॥ अस्यप्र
दानात्सकलं दीयते कलशोमया॥ प्रीयतां धर्मराजाय पूर्णाः स
न्तु मनोरथाः॥ वैशाख्यां पौर्णिमास्यां च कार्तिक्यां ग्रहणे तथा॥
वृषोत्सर्गं चयः कुर्यात्स प्राप्नोति श्रियं फलं॥ तस्मिन्नवस्त्रमे
दिनेसादिचतुर्दश्यां योगिनीमहोत्सवं कुर्यात्॥ तथा॥ तस्यामा
वास्यायां भावुकापूजनं कार्यं॥ भावुकापूजनं कुर्यादमायां वृषभो
त्सवे॥ तस्मिन्व्रते सस्यवृद्धिर्भवेदिति भयं विना॥ सा चतुर्दशी
योगिनीपूजायां रात्रिव्यापिनी पूर्वविद्धा त्रिमुहूर्त्तादिवच
नबलात्॥ इति वैशाखः॥ इदानीं ज्येष्ठतिथयः॥ तत्रादौ
सितद्वितीयासु भ्रातृद्वितीया॥ तस्यां रात्रौ भ्रातृ
पूजां लेखनीराज्यभगिन्यास्यगृहे भ्रातरो भोज्याः॥ अस्यां
भ्रातृद्वितीयायां भोजये द्भ्रातरं च्यसा इति स्कांदोक्तेः॥

तिपत्सद्वितीयास्यादियानासापूर्वविद्धायाद्यः॥तत्रैवशु
क्लदशमीदशपापहरास्मृता॥ज्येष्ठस्यशुक्लदशमीहस्तांगार
कसंयुताकायिकंत्रिविधंचैववाचिकंचचतुर्विधं॥मानसंत्रि
विधंचैवदशपापानिचैवहि॥गंगादिसीर्थेषुस्नानाद्या
चरतोन्नरः॥हरयदशविधंतस्माद्दशहरास्मृता॥मार्तंडः॥
यांकांचित्सरितंप्राप्यदद्यादमतिलोदकं॥हरतेदशपापानि
तस्माद्दशहरास्मृता॥क्रोमेज्येष्ठस्यशुक्लदशमीभवेत्सोम
दिनेयदि॥प्रोक्तहस्तर्क्षसंयुक्तातिथिर्दशहरास्मृता॥
तस्यांस्नानादितीर्थेषुदशपापहरंस्मृतं॥वराहपुराणे॥
दशमीशुक्लपक्षेचज्येष्ठमासिकुजेहनि॥अवतीर्णव
तीशावीहस्तर्क्षेचसरिद्वरा॥हरतेदशपापानितस्माद्दश
हरातुसा॥अदत्तानामुपादानंहिंसाचैवाविधानतः॥प
रदाराभिगमनंकायिकंत्रिविधंस्मृतं॥पारुष्यमपवादंच

पैशुन्यंचापिसर्वशः॥असंबद्धःप्रलापश्चवाचिकंस्याच्चतुर्वि
धं॥परद्रव्येष्वभिध्यानंमनसानिष्टचिंतनं॥वितथाभिनिवे
शश्चमानसंत्रिविधंस्मृतं॥विशेषांतरकाशीखंडे॥ज्येष्ठमा
सिसितेपक्षेदशमीबुधहस्तयोः॥गरानंदेव्यतीपातेकन्या
चंद्रेवृषरवौ॥एभिस्तुदशभिर्योगैर्हंतिपापानिवेदशा॥तस्मा
द्दशहराप्रोक्तागंगाजन्मदिनःस्मृतः॥अस्यांस्नानंकुरुतजसंगे
गायांबहुपुण्यदं॥ज्येष्ठशुक्लप्रतिपदारभ्यगंगाजन्ममहोत्सवः
कुर्यात्॥॥अथवटसावित्रीव्रतनिर्णयः॥ज्येष्ठपौर्णमास्यां
सावित्रीव्रतंकुर्यात्॥तदुक्तंस्कांदमाहेश्वरयोः॥ज्येष्ठमासिसि
तपक्षेद्वादश्यांरजनीमुखे॥इत्युपक्रम्य॥व्रतंत्रिरात्रमुद्दिश्य
दिवारात्रिस्थिताभवेदिति॥अतोत्युपसंहृतं॥ज्येष्ठमासितप
क्षेपौर्णमास्यांतथाव्रतं॥चीर्णंपुरामहाभाग्यकथितंतेमया

न्यपेति॥ दक्षिणा सा श्वेतदेवा क्रियते॥ एतद्व्रतमावास्यायामप्यु
क्तं निर्णयामृते भविष्ये॥ अमायां च यथा ज्येष्ठे वटमूले महासती
त्रिरात्रोपोषिता नारी विधिनानेन पूजयेत्॥ अरात्रौ तु त्रयोदश्यां
नक्तं कुर्याज्जितेंद्रिया॥ अयाचितं चतुर्दश्यां अमायां समुपोष
णं॥ एतत्तु पक्षद्वयाद्वा क्रियते॥ अत्र पौर्णिमामावास्ये पूर्वविद्धे
ग्राह्ये॥ भूतविद्धे न कर्तव्ये दर्शपूर्णे कदाचन॥ वर्जयित्वा मुनिश्रे
ष्ठ सावित्रीव्रतमुत्तमं इति ब्रह्मवैवर्तस्मरणात्॥ स्त्रीदेपि॥ भू
तविद्धे सिनीवाली न तु तत्र व्रतं चरेत्॥ वर्जयित्वा तु सावित्रीव्र
तं तु त्रिरिव ब्राह्मणेति॥ यदा त्रयोदशी घटिका चतुर्दशी तदा
परा ग्राह्या॥ पूर्वविद्धैव सावित्रीव्रते पंचदशी तिथिः॥ ना
ड्योस्तु दशभूतस्य सुश्वेतस्य परा तु नीतिमाधवः॥ वसुत
सु॥ भूतोस्तु दशनाडीभिर्दूषयत्युत्तरां तिथिमियस्य व्रतं

॥२४॥

DR. BHAU DAJI

नतरे सावकाशत्वात्॥ विशेषतः प्रदत्तपूर्वविद्धा विधाय कर्वे
नैस्य बोधादस्तु दशनाडीवेधेपि पूर्वैव ग्राह्या पंथाः साधु॥ अत्र
पौर्णिमारोधने वयथा त्रिरात्रिसंपत्तिर्भवति तथात्र त्रयोदश्या
दिग्राह्यं॥ तस्याः प्रधानत्वात्॥ अयं निर्णयो माघामपि ज्ञेयः॥
पारणं तु पौर्णिमांते कार्यं॥ अत्र स्त्रीव्रतेषु विशेषः परिभाषाया
मुक्तः॥ अथ विशेषो भविष्ये गृहीत्वा वालुकापात्रे प्रस्थमात्रं
युधिष्ठिर॥ ततो वशमयं पात्रे वस्त्रयुग्मेन वेष्टिते॥ सावि
त्रीप्रतिमां कुर्यात् सौवर्णीं वापि मृन्मयीं॥ साद्वैसयव्रतासाध्वी
फलैर्नैवेद्यदीपकैः॥ रक्तपाकैश्च सूत्रैश्च शुभैः कुंकुमकेसरैः॥
पूजयेदिति शेषः॥ रजनीहरिद्राकंगसूत्रं सौभाग्यतंतुः॥ सा
वित्र्याख्यानकं चापि वाचयित्वा द्विजोत्तमैः॥ रात्रौ जागर
णं कृत्वा प्रभाते विमले ततः॥ तामपि ब्रह्मणे दत्वा प्रलिपय

क्षमापयेत्॥ मंत्रस्तु॥ सावित्रीयमयादत्तासहिरण्यामहासती॥
ब्रह्मणःप्रीतिनार्थायकृष्णदेवप्रतिगृह्यतां॥ एतेनानेनराजेंद्र
वैधव्यंनाप्नुयुःक्वचित्॥ ज्येष्ठपौर्णिमास्यांविशेषः॥ आ
दित्यपुराणे॥ ज्येष्ठमासितिलान्मृद्यात्पौर्णिमायांविशेषतः॥
अश्वमेधस्ययत्पुण्यंतत्प्राप्नोतिनसंशयः॥ विष्णुरपि॥ ज्येष्ठि
ज्येष्ठायुताचेत्स्यातस्यांछत्रोपानहौदानेननरोनराधिपयम
प्राप्नोतिति॥ इयंमन्वादिरपि॥ सापौर्णिकीग्राह्यविशेषत
चैत्रेउक्तं॥ तथाऽपरार्केवामनपुराणे॥ उदकुंभाबुदानंतुताल
वृंतंचचंदनं॥ त्रिविक्रमस्यप्रीत्यर्थंदातव्यंज्येष्ठमासिति॥
इतिवटसावित्रीनिर्णयः॥ इतिज्येष्ठनिर्णयः॥ अथाषा
ढनिर्णयोनिर्णीयते॥ आषाढशुक्लद्वादश्यामनुराधायांगं
तिष्ययोगेनक्षत्रभागत्रेतेप्रथमभागेयोगरहितायांपारणंकुर्या
त्॥ अस्यामेवविष्णोःशयनोत्सवः॥ चातुर्मास्यव्रतारंभश्चका

॥२५॥

द्वश्यांद्वादश्यांवाकार्यः॥ आषाढीपौर्णिमासीकोकिलाव्रते
सायाह्नव्यापिनीग्राह्या॥ अस्यामेवव्यासपूर्णोक्तं॥ तत्रत्रिमुहू
र्तीचेयसराग्राह्या॥ भविष्ये॥ श्रावणेवर्जयेच्छाकंदधिमाद्रप
दे तथा॥ दुग्धंमाघेयुजेमासिकार्तिकेद्विदलंत्यजेत्॥ द्विदलंत
लंतु॥ माषमुद्गमसुराश्चचणकाश्चकुलित्थकाः॥ निष्पावाराज
माषाश्चआषाढ्यांद्विदलंस्मृतं॥ बीजमेवसमुद्भूतंद्विदलं
चांकुरंविना॥ दृश्यतेयस्यसस्येषुद्विदलंतन्निगद्यतइति॥ द्वि
दलंसकंयस्यस्वरूपंतदेववर्जयेदित्याहुः॥ इत्याषाढः॥
अथश्रावणनिर्णयः॥ श्रावणशुक्लचतुर्थ्यांअविवाहितकु
मारकुमारीभिश्चैकविंशतिग्रंथियुतःसूत्ररूपोगणेशःपूज्यः॥
अत्रपूर्वस्मिन्मध्याह्नव्याप्तभावेपरस्मिन्मुहूर्तोचेसरा॥ अन्य
थापूर्वा॥ नागचतुर्थीमध्याह्नव्यापिन्येवोपोषणादौ॥ दिनद्व

॥२५॥

येतथातेतदभावेवापूरेव॥ ॥अथनागपंचमीनिर्णयः॥भ॥
विष्ये॥शुक्लपक्षेथवापूर्वेपंचम्यांश्रावणस्य॥द्वादशस्योभयते
लेख्यागोमयेनविषोल्बणाः॥पूजयेद्दधिवद्राजनुदधिद
र्वीकुरैकुशैः॥संस्नाप्यपयसाभक्त्यागंधपुष्पाक्षतैः॥ब्रा
ह्मणान्भोजयेद्भक्त्याव्रतंकुर्वीतभक्तितः॥प्रतिसंवत्सरंनियं
नतेषासर्पजंभयं॥षष्ठीयुक्तातुसाकार्यापंचमीनागपूजने॥
चतुर्थीसहिताचैवकर्तव्यानकदाचन॥नभसःपंचमीशुक्ला
त्रिमुहूर्तायदिसापरा॥ग्राह्याव्रतेपूजनेचएकभक्तेसदान्य
ति॥तदेवोक्तंविषेशेषाडंधरे॥नभसःपंचमीशुक्लात्रिमुहू
र्तासापरान्विता॥आसायंसातिथिर्ज्ञेयास्नानदानव्रतादिन॥
एवमेवाषाढकार्तिकमार्गशीर्षमासेष्वपिशुक्लपंचम्यांनाग
पूजनंकार्यं॥क्वचिद्द्वौचतुर्थ्यामपिनागपूजनंकुर्वंति॥सा

॥२६॥

॥२६॥

चमीयुक्तैतेति॥उर्ज्जशुक्लचतुर्थ्यापरयुक्तशुभप्रदा॥फलि
नःपूजयेतत्रप्रसीदंतिफलीश्वराः॥एवंसतिउर्ज्जशुक्लचतुर्थीपंचमी
विद्धा॥तद्युक्तिरिक्तनागपूजनेचतुर्थीसर्वत्रपरविद्धेतिसिद्धांतः॥
अतोत्तरविद्धेपंचम्यांनागपूजनमुक्तं॥नतूपवासः॥येषांकुळ
मौक्तोपवासस्तैश्चतुर्थ्यांयुक्तपंचम्यामुपोषणंलक्षापरेद्युर्नागपू
जनंकार्यंएतद्विषयपूर्वविद्धपंचमीप्रतिपादकवचनानिव्यवस्थि
पनीयानि॥पूजनादौतुषष्ठीयुक्तेतिसर्वसंमतं॥नकश्चिद्विरोधः॥
नागकुलेप्रविष्टे॥वासुकिस्तक्षकश्चैवकालीयश्चैवभद्रकः॥अ
रावतोधृतराष्ट्रःकर्कोटकधनंजयौ॥एतेप्रयच्छंतुभयंप्राणिना
मुर्वितःसदा॥॥इतिनागपंचमीनिर्णयः॥तथैवात्रशुक्लचतु
र्दश्यां॥पवित्रारोपणेदेवाःप्रयच्छंतिसमीहितं॥कालादेर्ज्ञे॥अ
पादांतचतुर्दश्यांनभस्यनभसोस्तथा॥अष्टम्यांचचतुर्दश्यां
पक्षयोरुभयोरपि॥पवित्रारोपणंकार्यंनतुकालांतरेहितमिति॥

आषाढीतद्दिनेनपौर्णिमांतोमासोविवक्षितः॥आषाढशुक्ल
चतुर्दश्योमियर्थः॥मोहचूलोत्तरे॥आषाढस्यसितोद्दिष्टाश्रावणा
स्यसितासितैति॥इयमपिचतुर्दशीपूर्वविद्धाग्राह्या॥अस्यानि
र्णयस्तुदमनकचतुर्दशीवज्ज्ञातव्यः॥श्रावणशुक्लचतुर्दशी
कुलधर्मपवित्रारोपणादौपूर्वैवसायंकालव्यापिनीग्राह्या॥त
थाचैवश्रावणर्क्षेउपाकर्मकुर्यात्॥तत्रधनिष्ठायुक्तैःश्रवणा
ग्राह्यः॥उत्तराषाढयुक्तैर्निषिद्धः॥पूर्वेद्युरुत्तराषाढायोगप
रेद्युरेवंश्रवणाभावेघटिकाद्वयन्यूनेहस्तयुक्तेपंचम्यादौका
र्यं॥तद्यैवसंक्रांतिग्रहणगुरुशुक्रास्तादावधिकमासेनकार्यं॥
यद्यसंक्रांतिगुरुशुक्रास्तादौनूतनब्रह्मचारिणामेवपंचम्यादौ
अन्येषामहोरात्रोत्तरंग्रहणादौश्रवणयुतेएषकार्यं॥तत्तरीया
उदयव्यापिन्यापौर्णिमास्यांकुर्युः॥कात्यायनानांतुदिनद्वयपू
र्वाह्णव्याप्तौएकदेशस्यत्रीवापूर्वेतिहेमाद्रिः॥निर्णयामृते

॥२७॥

॥२७॥

सुयजुःशाखिनामोदयिकपरमुक्तवान्॥तद्यजुःशाखिनामित्तिनैति
रायपरं॥रामोक्तेनुक्तेनुपूर्वोग्राह्यएवयुक्तं॥अस्यांस्नानमादौतैलाभ्यंगंत
विधायपश्चान्नद्यादौस्नातव्यं॥ननुनस्नायादुत्सवेनीतेमांगल्यंविनिव
र्तेचेत्॥अनुव्रज्यसुहृद्बंधूनभ्यर्चयेत्तेष्टदेवतां॥तथा॥नाभ्यक्तोभूषितस्तु
ष्टःप्रोषितोयातिलुप्तकः॥प्रियंबंधुमनुव्रज्यनस्नायात्सतमंगलः॥इत्या
दिवक्तुराक्रसङ्गवात्॥कार्यमांगलिकस्नानंसतांकार्यंबहिःस्नायादि
त्युक्तं॥इयत्राह॥रागस्नानविषयतादिधिस्तस्नानेनिषेधाप्रवृ
त्तेः॥विधिवेमेषविक्रयादिप्रसंगादलभ्ययोगपुत्रजन्मवत्॥अतोन
विरोधः॥ननुअत्राभ्यंगः॥कर्तव्यइतिविधिर्नास्ति॥मैवं॥मलापकर्ष
स्नानांगपूर्वाभ्यंगःकर्तव्यएव॥अकरणेप्रत्यवायस्मरणात्॥दृष्ट्या
परिसिष्टे॥॥तैलाभ्यंगंविधायादौनद्यादौस्नानमाचरेत्॥रसीन्द्र
र्मिमयान्कृत्वापूजयेत्सयतोद्विजः॥तदुक्तंकारिकायां॥तैलाभ्यंगमकृ
त्वायःअवलीकर्ममारभेत्॥पच्यतेनरकेघोरेयावदाभूतसंप्लवं॥

नविष्येपि॥ श्रावण्यां बलिराज्ये चवसंतामुदयेतथा॥ तैलाभ्यंगम
कुर्वीतनरकंप्रतिपद्यते॥ अभ्यंगाकरणेदोषश्रवणात्॥ अतोभ्य
गंविधायैवश्रावणीकार्या॥ अस्यावभ्यंगोगृहस्थस्यैव॥ नब्रह्मचा
रिणां॥ श्रावणपौर्णिमासीकुलधर्मपवित्रारोपणादौपूर्ववत्॥ अस्या
मभ्यंगोनियः॥ अस्यामेवभद्रारहितायांरक्षाबंधनंकार्यं॥ श्रवणा
कर्मण्यस्तमययोगीनीग्राह्या॥ खंडशेषपर्वणिकुर्यात्॥ अथतत्रैव
शुक्लपक्षेसंकष्टचतुर्थीमुख्या॥ तदुक्तंस्कांदे॥ श्रवणेबहुलेपक्षे
चतुर्थ्यांचविधूदये॥ तस्मिन्दिनेव्रतंकार्यंसंकष्टाख्यंसुरेश्वरि॥
प्रातःशुचिर्भवेत्सौम्योदंतधावनपूर्वकं॥ निराहारोघटेवेशायाच्छु
द्धोदयोभवेत्॥ अस्यास्तुचंद्रोदयविधिसद्भावात्यदिनेबहुकाले
चंद्रोदयेव्यापिनीसाग्राह्या॥ निशाव्रतेषुसाग्राह्याप्रदोषव्यापि
निनिशिः॥ यस्मिन्काले तुयत्कर्मेति॥ यत्रचोदयतिशशीसादिपूर्वं
कैवचनैःप्रायःपूर्वविद्धाएव॥ यतोबहुकालव्यापिनीतत्रामाव

॥२८॥

योगःत्रयाणांनिशादिपुण्यतिथयश्रवणात्॥ अपिचंद्रोदयवेलायांप्रा
सापूर्वविद्धाएव॥ अस्याविधिस्तत्कल्पोक्तोज्ञेयः॥ तथाचैवशुक्लाष्टमी॥
अथजन्माष्टमीनिर्णयः॥ रोहिण्यामर्द्धरात्रेचयदाशुक्लाष्टमीभवेत्॥
तस्यामभ्यर्चनंशौरेर्हंतिपापंत्रिजन्मजम्॥ यदिनाक्षैःरोहिण्यष्टम्य
र्द्धरात्रयोगस्यप्राप्तस्यसतिदिनद्वयेपिकुर्द्धरात्रेरोहिण्यष्टमीयोगा
सिनविद्यतेवातदा॥ वर्जनीयाप्रयत्नेनसप्तमीसंयुताष्टमी॥ ब्रह्म
वैवर्तवचनात्॥ परेवेयाह॥ रोहिण्यासहितानिशीथसमयंवाया
नवासंस्पृशेत्सोष्टमुत्तरायांगतास्तोपवसनेति॥ यायात्रगच्छे
त्॥ यदापूर्वदिनेऽर्धरात्रादूर्ध्वंअष्टमीप्रवृत्ताद्वितीयेनिघटि
कामात्रंमुहूर्तंवारोहिणीस्यात्तदोत्तरेयाह॥ अथार्धनिशीयदु
वेत्॥ अष्टम्याश्चनिशीयत्रदिवसनाडीमुहूर्तादिवापस्यापिपरतः
तइति॥ नाडीमियत्रकालार्धनोरितिद्वितीया॥ तत्रचस्कांदे॥ सप्तमी
संयुताष्टम्यांमृताजन्मसद्विजोत्तम॥ प्राजापत्यद्वितीयेनिमुहूर्त
द्वयंभवेद्यदि॥ तदाष्टम्यामिदंतत्यंप्रोक्तंव्यासादिभिःपुरा॥ पत्रेपि॥

मुहूर्तेनापि संयुक्ता संपूर्णा साष्टमी भवेत्॥ किं पुनर्नवमीयुक्ता कुल
कोट्यार्द्धस्तु मुक्तिदा॥ अथ भयुतां यैव स्मृता सा ब्रवीति॥ यदा अंग
द्वितीयैव नभयुता नक्षत्रयुक्ता न पूर्वा तदा सा यत्र ते स्मृता॥ तथा च
विष्णुरहस्ये॥ प्राजापत्यर्क्षसंयुक्ता लक्ष्मीनभसि चाष्टमी॥ मु
हूर्तमपि लभ्येत सोपोष्या सा महाफला॥ तस्याश्चैव वारः योगः प्रा
स्तहेमो॥ सापि स्याद्बुधसोमयुग्यदि तदा तीर्थे वरा स्तादृति॥ तथा
पद्मपुराणे॥ प्रेतयोनिगतानां तु प्रेतत्वं नाशितं नरैः॥ यैः कृता
वलोमासि अष्टमी रोहिणीयुता॥ किं पुनर्बुधवारेण सोमेनापि
विशेषतः॥ किं पुनर्नवमीयुक्ता कुलकोट्यस्तु मुक्तिदेति॥ उक्ते
रविद्वामुक्ता पूर्वविद्धा माह॥ अथ या पूर्वैव सप्तयुता॥ अथ भयु
ता सा स्वकुलहेतुर्भवेत्॥ तां पूर्वां समुपवसेदिति॥ या च पूर्व
दिने एवार्द्धरात्रे भयुता तामपि पूर्वामुपवसेत्॥ रोहिण्यामर्द्धरात्रे
चेत्यादिवाक्येस्तु स्याः पापहरत्वं विधानात्॥ या च दिनद्वये रोहि

BHAU DAJI

णीरहिता तामपि पूर्वामुपवसेत्॥ लक्ष्मपक्षे अष्टमी चैव लक्ष्मपक्षे च
तुर्दशी॥ पूर्वविद्धैव तत्र व्यापरविद्धा न कर्हिचित्॥ यदि वाक्यवशादिय
र्थः॥ नक्षत्रनादेः स्थूलानयनं सूक्ष्मानयनं ज्योतिःशास्त्रे प्रसिद्धं॥
तत्र स्थूलानयनं व्यवहारप्रसिद्धमिति तदेवाश्रयणीयमित्याह॥ इह
यथा स्थूलेन भाश्रयेदिति॥ इह अस्मिन्शास्त्रे स्थूलेन यथा
गेमालिभादिनक्षत्रादिआश्रयेदित्यन्वयः॥ तथा च ज्योतिःशास्त्रं॥
स्थूलं लक्षं भानयनं यदेतज्ज्योतिर्विदां तद्व्यवहारसिद्धौ॥ सूक्ष्मं प्रवक्ष्ये
अमुनि प्रलीतं विहाय यात्रादिफलप्रसिद्धौ॥ ॥ तथा च स्मृतिसिद्धौ॥
भाद्रकृष्णाष्टम्यां श्रीकृष्णजन्माष्टमीव्रतं कर्तव्यं॥ मासि भाद्रपदे कृष्णा
निशीथे कृष्णपक्षजे॥ शशाङ्कवृषराशिस्थे चन्द्रे रोहिणिसंज्ञके॥ यो
गे अस्मिन्वसुदेवाद्दिवकी मामजीजनत्॥ भगवत्या अत्र वक्ष्यते
सुमहोत्सवः॥ यस्मिन्कृष्णाष्टम्यां सिंहराशिगते रवावित्यादि॥
शुक्लतमासाभिप्रायमेतत्॥ अतएवैकं कृष्णतमासाभिप्रायेणैव श्रावण
श्रावणेति॥ प्रोचः॥ वस्तुतस्तु दर्शतमासाभिप्रायेणैव श्रावण

६८

भाद्रपदव्यपदेशः॥ तत्र श्रावणे मुख्यः कल्पः॥ भाद्रे नुकल्पः॥ तथा
च वसिष्ठसंहितायां॥ श्रावणे वा नभस्ये रोहिणीसहिताष्टमी॥ य
दा भानेरेव श्वासा जयंती प्रकीर्तिता॥ श्रावणे नभसि वेद्या गौ नभस्य
नुभवे॥ इति॥ तयोरभावे योगस्य तस्मिन्वर्षे न संभवति॥ अत्र
च श्रावणभाद्रपदयोर्दर्शपूर्णिमांतत्वमिप्रायेणैव योगो क्रियमाणे
श्रावणे वा नभस्ये वेति विकल्पानुपपत्तिः॥ वस्तुनि विकल्पसंभवात्
योगसंभवासंभवानुपपत्तिश्चापि माधवस्यापि स्वरसः॥ तस्मान्मा
सद्वयाभिप्रायेणैव पदं व्यपदेशो इति॥ तत्र कारणं॥ सप्तमीतिथिर्ज
यंती रोहिणीयुक्ता श्रावणे कृष्णाष्टम्यां अर्द्धरात्रादधः कलामात्रेण
पि विद्धा जयंती सुसंवेद्या॥ तदुक्तं विष्णुधर्मोत्तरे॥ रोहिणीसहि
ता कृष्णा मासि भाद्रपदाष्टमी॥ सप्तम्यामर्द्धरात्रादधः कलयापि यदा भवे
त्॥ तत्र जातो जगन्नाथः कंसस्तु भगवान्हरिरच्युतः॥ तमेवापवसेत्कालं कु
र्यात्तत्रैव जागरं॥ अर्द्धरात्रे तु योगो यं तारापद्युदयो सतिति॥ नियत

॥३०॥

लाशुचिः स्नातः पूजां तत्र प्रवर्त्तयेदिति॥ अत्र हेमाद्रिः॥ रोहिण्यां
अर्द्धरात्रे च यदा क्षेत्रे सप्तमी भवेत्॥ तस्यां मध्यं चनं गौरं हंतिपापं त्रिज
न्मजमित्यादिभविष्यपुराणादिवाक्यैर्निशीथाष्टमी रोहिणीयो
गवती मुख्या॥ सा च द्विविधा॥ पूर्वविद्धा परविद्धा चेति॥ तत्रा द्या त्रि
विधा॥ पूर्वे द्युरवयत्रकापि रोहिणीयुक्ता नो भयत्र रोहिणीयुक्ता
चेति॥ सा च सर्वा पूर्वैव पोष्या॥ आद्ये॥ सुहृत्रमध्यहरात्रे यस्मिन्यु
क्ते हि लभ्यते॥ अष्टम्यां रोहिणीरक्षं तां पुण्यां समुपावसेदिति विष्णु
रहस्यात्॥ मध्ये॥ रोहिण्यामर्द्धरात्रे चेत्कृष्णाभविष्यद्वाक्यात्॥ अन्ये॥
कृष्णापक्षे अष्टमी चेत्कृष्णपक्षे चतुर्दशी॥ पूर्वविद्धैव कर्तव्या परा
द्वा न कस्यचिदिति यापस्तंबवाक्यात्॥ परा चतुर्विधा॥ उभयत्र
निशीथे रोहिणीयुक्ता॥ नो भयत्र निशीथे रोहिणीयुक्ता॥ परे द्युर
रोहिणीयुक्ता चेति॥ सा च सर्वापि परैव पोष्या॥ प्रथमद्वितीये
यथा॥ वर्जनीया प्रयत्नेन सप्तमी संयुताष्टमी॥ इति ब्रह्मवैवर्ते

द्वतीये॥ससमीसंयुताष्टम्यांभूत्वारक्षंद्विजोत्तम॥प्राजापत्यंद्वि
तीयेऽहिमुहूर्तार्धंभवेद्यदि॥तदष्टम्यामिकर्तव्यंप्रोक्तंव्यासादिभिः
परेति स्कांदात्॥मुहूर्तेनापिसंयुक्तासंपूर्णाअष्टमीभवेत्॥किं
पुनर्नवमीयुक्तोकुलकोद्यास्तुमुक्तिदेतिपाद्मात्॥चतुर्थ॥
उदयेचाष्टमीकिंचिन्नवमीसकलायदि॥भवेत्तेबुधसंयुक्तप्रा
जापत्यर्क्षसंयुता॥अपिवर्षशतेनापिलभ्यतेवानवाविभोइतिस्कां
दात्॥॥अनंतभट्टास्तुतांघोडशमेदामाहुः॥॥यथा॥शुद्धस
मारोहिणीयुता॥१॥तद्रहिता॥शुद्धन्यूनारोहिणीसयुता॥३॥त
द्रहिता४॥शुद्धाधिकरोहिणीरहिता५॥साचपरेद्युरोहिणीस
हिता६॥पूर्वेद्युःरोहिणीसहिता७॥उदयदिनेरोहिणीसहिता८॥
एवंविद्धापिदेवंशोडशमेदाः॥तत्रशुद्धाधिकाविद्धाधिकाचो
तरास्मिन्नेवदिनेसनक्षत्रोचेतदापरेव॥मुहूर्तमध्यरात्रद

तिविस्तुरहस्यात्॥सेवोभयत्रसनक्षत्रासतीपरेद्युर्बुधवारोस
युक्ताइतिविस्तुरहस्यात्॥सेवोभयत्रनक्षत्रासतीपरेद्युर्बुधसोमयु
क्ताचेपरेव॥यदाकृताश्रावणमासिअष्टमीरोहिणीयुता॥किंपुनर्बु
धवारेणसोमेनापिविशेषतः॥किंपुनर्नवमीवेयुक्तोकुलकोद्यास्तुमुक्ति
देतिपाद्मात्॥यदातिथिनक्षत्रंद्वेद्योभयत्रापरेद्युर्नक्षत्रया
गस्तदापिपरेव॥सत्रक्षापिनकर्तव्यंससमीसंयुताष्टमीतिनिषेधा
त्॥अन्याद्वादशापिपूर्वाएव॥जन्माष्टमीरोहिणीवत्रिवरात्रिस्त
थैवच॥पूर्वविद्धैवकर्तव्यातिथिक्षांतेचपारणामित्यादिवचननिम
यादिति॥अत्रमतद्वयेयथैकव्रतत्वमवगम्यतेव्रतभेदाप्रतिपाद
नात्॥तत्रजयंतीव्रतमेव॥तदपिकाम्यमेवयनंतभट्टाः॥नियमो
काम्यमितिहेमाद्रिः॥माधवस्तुजन्माष्टमीव्रताज्जयंतीव्रतस्यभे
दमुक्त्वापूर्वस्यनित्यत्वमुत्तरस्यनित्यकाम्यत्वमाह॥तथा॥॥जन्मा
ष्टमीजयंतीव्रतयोर्भेदाभेदसंदेहेनदद्वातपूर्वःपक्षःरूपभे
दाभावात्॥उपवासजागरणादिव्रतस्यरूपंयथायागस्यद्रव्य

दिवतेतत्रद्वयोरपितुल्यमेवतत्रश्रेस्पष्टयिष्यते॥अथरूपाभे
दिपिनियमाभ्यांभेदःस्यात्नियाहिजन्माष्टमीअकरणेद्वि
चाषअवणात्॥यथास्कंदे॥॥येनकुर्वंतिजानंतःस्वलाजन्माष्ट
मीव्रतं॥तेसर्वेतिनरप्राज्ञान्याचोलोमाश्रुकानन्यादि॥जयंती
नुकाम्यफलोक्तः॥तथातत्रैव॥महाजयाद्येकुरुतेजयंतीमुक्तयेनघ॥
धर्ममर्थंचकामंचमोक्षंचमुनिपुंगव॥ददातिवांछितानर्थान्नान
र्थेनातिदुर्लभमिति॥तदपिन॥गरूपतयोगुणफलेनापिजयंत्याः
फलविशेषोपपत्तेः॥गोदोहनेनपशुकामस्यप्रलयेद्वेंद्रियस्य
जुहुयादितिवत्॥जयंत्याष्टमीरोहिणीयोगरूपतयोकालविशे
षस्तुगुणवैसंभवात्॥तथाविष्णुरहस्ये॥॥अष्टमीकृष्णपक्षस्य
रोहिणीरक्षसंयुता॥भवेद्भाद्रपदेमासिजयंतीनामसास्मृतेति॥
तस्मान्नव्रतभेदप्राप्तउच्यते॥नामरूपनिमित्तौशुद्धमिश्रत्व
भेदतः॥जन्माष्टमीजयंत्योर्हिभेदोनिर्देशभेदतः॥तथाहि॥॥

॥७२॥

॥७२॥

उक्तवाक्ययोर्जन्माष्टमीजयंतीनामभेदादशेषज्योतिरशेषविश्वज्यो
तिरशेषसर्वज्योतिरित्यत्रैवकर्मभेदः॥तथाउपवासमात्रंजन्माष्टमी
व्रतस्वरूपं॥उक्तिवाक्येतावन्मात्रप्रत्ययात्॥तथाकेवलेनोपवासेन
तस्मिंजन्मदिनेमम॥यातजन्मकृतापापान्मुच्यतेनात्रसंशयः
इति॥अतएवतावन्मात्राकरणएवप्रत्ययोनोनिद्रायांदानाद्यभावे
वायथा॥गृध्रमांसंखगक्रव्यंश्येनंचमुनिसत्तम॥मांसंवापिपदांशु
भुक्तमुक्तंजन्माष्टमीदिनेइति॥जयंतीस्वरूपंतूपवासजागरणपूजा
दि॥यथानारदीयसंहितायां॥॥उपोष्यजन्मविन्कानिकुर्याज्जागर
णंमुदा॥भविष्योत्तरे॥मासिभाद्रपदेष्टम्यांनिशीथेकृष्णपक्षगेः॥
यदाशंकेषरात्रिस्थेरक्षेरोहिणिसंज्ञके॥योगेस्मिन्वसुदेवाद्वि
देवकीमामजीजगत्॥तस्मान्मांपूजयेत्तत्रशुचिसम्यगुपोषितः॥ब्राह्म
णान्भोजयेद्भक्त्यातोदद्याद्दक्षिणामियादि॥तस्मादामिक्षाकार
णन्यायेनात्रापिरूपभेदाद्भेदः॥तथाजन्माष्टमीव्रतेतिथिरेवनिमि
त्तंसमाख्याबलात्॥जयंतीव्रतेतुरोहिणीयोगः॥पूर्वोक्तविष्णुरहस्ये

वाक्यात्। यद्यप्यविद्धायां तु सप्तम्यां जातो देवकीनंदन इति ब्रह्मवै
र्त्तादत्रापि रोहिणीयोगो निमित्तं तथापि समाख्यायां तिथिमात्रस्यैव प्रा
धान्यमन्यथा बारयोगादिष्वतिप्रसंगात्॥ यद्यपि नेदं स्यं तत्रभेदप्रमा
णं तथापि संज्ञाप्रमाणो पोद्बलकमित्युपन्यस्तं॥ तथा शुद्धनिशाजन्माष्ट
मीयेन कुर्वीत जानंतइत्यादिस्कांदादिवाक्यात्॥ जयंतीचनियाम्या॥
शुद्धेनेन तुयसापंशावहस्तस्कांदाजने॥ तसापंछ[illegible]मतेकुर्वीतजय
ंतीविमुखोनरइत्यादिस्कांदादिवाक्यैर्नियाया अपिमहाजयायमि
त्यादिपूर्वोक्तिवाक्याकाम्यत्वात्॥ तस्माज्जन्माष्टमीजयंतीचत्रिवरा
त्रिस्तथैवचेतिगरुडवाक्ये जन्माष्टमीजयंत्योः पृथक्निर्देशाद्भेद
इति सिद्धोभेदः॥ ननुभेदाभेदयोः कोनुष्ठानेविशेषइतिचेत्॥ म
हत्विशेषः॥ अभेदे दृष्टयोरोहिण्ययोगे जयंतीव्रतलोपवज्जन्माष्ट
मीव्रतमपिलुप्येत॥ भेदेतुजन्माष्टमीव्रतं स्यादेवेति॥ नन्वेवंयत्र हि
नद्वयेष्टमीरोहिणीतुपरेद्युरेव॥ तत्रपरेद्युः पूर्वव्रतपारणात्तर

व्रतोपवासयोर्विरोधइतिचेन्न॥ आद्यालोदकपानादिना
पिपारणासंभवात्॥ नचोपवासद्वयमेवंदोषयोः संभवेकेवल
तिथेरपेक्षणीयत्वात्॥ नित्यकाम्यानुष्ठानेन नित्यसिद्धेश्चेति॥ त
दिवंसिद्धे व्रतभेदे योगभेदेन तयोर्व्यवस्थाचिंतिता॥ हेमाद्रि
व्रतखंडे वह्निपुराणे॥ त्रेतायांद्वापरेचैव रामकृष्णयुगेपुरा॥ रो
हिणीसहिताचैव विद्वद्भिः समुपोषिता॥ वियोगे पारणंचक्रुर्मुनयो
ब्रह्मवादिनः॥ सांयोगिकेव्रते प्राप्ते यत्रक्वापिवियुज्यते॥ नतपारणंकु
र्यादेवं ब्रह्मविदोविदुः॥ अतःपरं महीपालसंप्राप्तेनाचसकलो॥ ज
न्मनोवासुदेवस्यभविता व्रतमुत्तमं॥ अनेनचपुराकल्पसूपेणा
र्थवादेन जयंतीव्रतं लताद्युगत्रयेकर्तव्यमितिरन्नायते॥ अन्य
थात्रप्रतिपादनेनुवैयर्थ्यात्॥ अतःपरमित्यादिनातुजन्माष्टमीव्रत
मेवकलौविधीयतइतिव्यवस्थासिद्धिः॥ तत्रतिथिर्निर्णेतव्या॥ सा
चशुद्धाविद्धाच॥ शुद्धाअहोरात्रव्यापिनी॥ विद्धाद्वानिशीतिथेः
समभागयुक्तेति॥ अष्टमीशिवरात्रिश्चद्वादशीरात्रादधोयदि॥ दृश्य
तेघटिकायासापूर्वविद्धाप्रकीर्तिता॥ तिस्मरणात्॥ शुद्धापिद्विविधा॥

निशीथव्यापिनीतदुव्यापिनीयेति॥तत्रोभयत्रापिपूर्वैव॥दिनाव
यदिवारात्रौनास्तिचेद्रोहिणीकला॥रात्रियुक्तंप्रकुर्वीतविशेषेण
दुसंयुतामितिश्रवणात्॥अन्याहनुकल्पःरात्रियुक्तमितिश्रवणात्
विद्धाचतुर्विधा॥पूर्वेद्युरेवनिशीथव्यापिनीपरेद्युरेव--उभ
यत्रनोभयत्रचेति॥तत्रैकव्याप्तौसैवविशेषेदुसंयुक्तमितिस्मृ
ति॥अन्ययोस्तुपरेव॥संकल्पकालमारभ्यसप्तात्॥नचसप्तमीप
ष्टमीचैवेयमेनपूर्वाप्रसंगः॥तस्याहर्वैधविषयत्वात्॥अन्यथाव
तांतरेष्वपिनिशीथवैधप्रसंगः॥॥इतिजन्माष्टमीनिर्णयः॥॥॥अ
थजयंतीनिर्णयः॥॥सापिचतुर्द्धा॥शुद्धाविद्धाशुद्धाधिकाविद्धाधिकाचेति॥अत्रापिशुद्धाविद्धापूर्वैकएव॥तयोश्चयोस्त्रिविधः॥
संपूर्णानिशीथेयत्रकुत्रापिचेति॥एतेषुषट्स्वपिभेदेषुदिनांतरे
योगाभावेपूर्वैव॥यथाहवसिष्ठः॥अहोरात्रेतयोर्योगोअसंपूर्णो
भवेद्यदि॥अर्द्धरात्रेचयोगोयंतारापस्योदयेसति॥योगतारात
स्थेचप्रशस्यतारतम्यंज्ञेयं॥यथायत्रकुत्रापियोगःप्रशस्तः॥
निशीथप्रशस्ततरः॥संपूर्णप्रशस्ततमःइति॥शुद्धाधिका

॥३८॥

॥३८॥

पित्रिविधा॥पूर्वेद्युरेवरोहिणीयुक्तापरेद्युरेवउभयत्रचेति॥त
त्रैकत्रयोगेसैवकोष्टांतराभावात्॥अंसपक्षेतुपूर्वैव॥गुणाधि
क्यात्॥यथा॥त्रिविधसावेदुभयत्रतिथिनक्षत्रयोगः॥पूर्वेद्युरव
यासहप्रवृत्तयास्तिथिनक्षत्रयोर्वृद्ध्यापरेद्युरेनुवृत्तिः॥पूर्वेद्यु
र्निशीथोमारभ्यैवनक्षत्रप्रवृत्तिः॥परेद्युरेनुवृत्तिश्चपूर्वेद्युर्निशी
थादूर्ध्वंप्रवृत्तिःपरेद्युरनुप्रवृत्तिश्चेति॥तत्राद्येसंपूर्णेहलस्तकाष्ट
याप्तिर्निशीथव्याप्तिश्चेतित्रयोगुणाः॥द्वितीयेनिशीथजयंतीसर्व
अंसनिशीथउभयत्रापिजयंसभावेपितिथिप्राधान्यंगुणइति॥
तत्रचरोहिणीसहिताष्टमीयादिप्रयोगेषुसहयुक्तप्रधानइतिपाणि
निस्मरणात्॥रोहिण्याअंगभावात्सिध्यति॥विद्धाधिकापित्रिविधा॥
पूर्वेद्युरेवरोहिणीयुक्तापरेद्युरेवउभयत्रचेतितत्रैकेकयोगेसैवको
ष्टांतराभावात्॥विनारोहिणींनकर्तव्यानवमीसंयुताष्टमी॥कार्याविद्धा
